Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः॥२७॥ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने ॥२८॥ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शयाय च शिपिविष्टाय च नमो मीढुष्टमाय
चेषुमते च नमो ह्रस्वाय ॥ २९ ॥ नमो
ह्रस्वाय च वामनाय च नमो बृहते च
वर्षीयसे च नमो वृद्धाय च सवृधे च नमो-
ऽग्र्याय च प्रथमाय च नम आशवे ॥३०॥
नम आशवे चाजिराय च नमः शीघ्र्याय
च शीभ्याय च नम ऊर्म्याय चावस्व- १९
न्याय च नमो नादेयाय च द्वीप्याय च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ३१ ॥ नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒
नम॑÷ पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मद्ध्य॒-
माय॑ चापगल्भाय॑ च॒ नमो॑ जघ॒न्याय च
बुध्न्याय च॒ नम॒ः सोभ्याय॑ ॥ ३२ ॥
नम॒ः सोभ्याय॑ च प्रतिस॒र्याय च॒ नमो॒
याम्याय॑ च क्षेम्याय॑ च॒ नम॒ः श्लोक्याय॑
चावसान्याय च॒ नम॑ ऽउर्व॒र्याय च॒
खल्याय॑ च नमो॒ वन्याय॑ ॥ ३३ ॥ नमो॒

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
 वन्याय च कक्ष्याय च नमः श्रवाय च
प्रतिश्रवाय च नम आशुषेणाय चाशु-
रथाय च नमः शूराय चावभेदिने च नमो
बिल्मिने ॥ ३४ ॥ नमो बिल्मिने च
कवचिने च नमो वर्मिणे च वरूथिने च
नमः श्रुताय च श्रुतसेनाय च नमो
दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे २०
॥ ३५ ॥ नमो धृष्णवे च प्रमृशाय च
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे
चायुधिने च नमः स्वायुधाय च सुधन्वने
च ॥ ३६ ॥ नमः स्रुत्याय च पथ्याय
च नमः काट्याय च नीप्याय च नमः
कुल्याय च सरस्याय च नमो नादेयाय च
वैशन्ताय च नमः कूप्याय ॥ ३७ ॥ नमः
कूप्याय चावट्याय च नमो वीध्र्याय
चातप्याय च नमो मेघ्याय च विद्युत्याय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च नमो॒ वृक्ष्या॑य चावृक्ष्या॒य च नमो॑
२१ व्यात्त्या॑य ॥ ३८ ॥ नमो व्यात्त्या॑य च
रेष्म्या॑य च नमो॑ वास्तव्या॒य च वास्तुपाय॑
च नमः॒ सोमाय॑ च रुद्राय॑ च नम॑स्ताम्राय॑
चारुणाय॑ च नमः॒ शङ्गवे॑ ॥ ३९ ॥
नम॑ः शङ्गवे॑ च पशुपत॑ये च नम॑ ऽउग्राय॑
च भीमाय॑ च नमो॑ऽग्रेवधाय॑ च दूरेवधाय॑ २१
च नमो॑ हन्त्रे च हनी॑यसे च नमो॑ वृक्षेभ्यो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हरिकेशेभ्यो नमस्तारायं ॥ ४० ॥ नमः॑
शम्भवायं च मयोभवायं च नमः॑ शङ्करायं
च मयस्करायं च नमः॑ शिवायं च
शिवतंराय च ॥ ४१ ॥ नमः॒ पार्यांय
चावार्यांय च नमः॑ प्रतरंणाय चोत्तरंणाय
च नमस्तीर्थ्यांय च कूल्यांय च नमः॒
शष्प्यांय च फेन्यांय च नमः॑ सिकत्याय
॥४२॥ नमः॑ सिकत्याय च प्रवाह्याय च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमः किꣳशिलाय च क्षयणाय च नमः
कपर्दिने च पुलस्तये च नम इरिण्याय च
प्रपथ्याय च नमो व्रज्याय ॥४३॥ नमो
व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च
गेह्याय च नमो हृदय्याय च निवेष्प्याय च
नमः काट्याय च गह्वरेष्ठाय च नमः
शुष्क्याय ॥ ४४ ॥ नमः शुष्क्याय च २२
हरित्याय च नमः पाꣳसव्याय च रजस्याय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च नमो लोप्याय चोलप्याय च नम

ऽऊर्व्व्याय च सूर्व्व्याय च नमः पुर्णाय

॥४५॥ नमः पुर्णाय च पर्णशदाय च नमः

ऽउद्गुरमाणाय चाभिघ्नते च नमः

ऽआखिदते च प्रखिदते च नमः ऽइषुकृद्भ्यो

धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो

देवानाᳬं हृदयेभ्यो नमो विचिन्वत्केभ्यो

नमो विक्षिणत्केभ्यो नमः ऽआनिर्हतेभ्यः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ४६ ॥ द्रापे ऽअन्धसस्पते दरिद्र
नीलंलोहित ॥ आसां प्रजानामेषां पशूनां
मा भेर्म्मा रोङ्मो चं नः किञ्चनाममत्
॥ ४७ ॥ इमा रुद्राय तवसे कपर्द्दिने
क्षयद्वीराय प्प्रभरामहे मतीः यथा
शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
ऽअस्मिन्ननातुरम् ॥ ४८ ॥ या ते रुद्र २३
शिवा तनूः शिवा विश्वाहा भेषजी ॥ शिवा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुद्रस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य
दुर्मतिरघायोः ॥ अव स्थिरा मघ-
वद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय
मृड ॥ ५० ॥ मीढुष्टम शिवतम शिवो
नः सुमना भव ॥ परमे वृक्ष आयुधं
निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि ॥५१॥ विकिरिद्र विलोहित

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
 नमस्ते ऽअस्तु भगवः ॥ यास्ते सहस्रꣳ
हेतयोऽन्न्यमस्म्मन्निवपन्न्तु ताः ॥ ५२ ॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ॥
तासामीशानो भगवः पराचीना मुखा कृधि
॥ ५३ ॥ असङ्ख्याता सहस्राणि ये रुद्रा
ऽअधि भूम्याम् ॥ तेषाꣳ सहस्रयोजनेऽव
धन्न्वानि तन्न्मसि ॥ ५४ ॥ अस्मिन्न्महु- २४
त्यर्णवेऽन्न्तरिक्षे भवा ऽअधि ॥ तेषाꣳ
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्रयोजनेऽव धन्न्वानि तन्न्मसि ॥ ५५ ॥
नीलग्ग्रीवाः शितिकण्ठा दिवंᳯ रुद्रा ऽउपं-
श्रिताः ॥ तेषाᳪं सहस्रयोजनेऽव धन्न्वानि
तन्न्मसि ॥ ५६ ॥ नीलग्ग्रीवाः शितिकण्ठाः
शर्वा ऽअधः क्षमाचराः ॥ तेषाᳪं सहस्र-
योजनेऽव धन्न्वानि तन्न्मसि ॥ ५७ ॥ ये
वृक्षेषु शष्पिञ्जरा नीलग्ग्रीवा विलोहिताः ॥
४ तेषाᳪं सहस्रयोजनेऽव धन्न्वानि तन्न्मसि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुद्रा० ॥५८॥ ये भूतानामधिपतयो विशिखासः अ०
२५ कपर्दिनः ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि ५
तन्मासि ॥५९॥ ये पथां पथिरक्षय ऽऐलबृदा
ऽआयुर्युधः ॥ तेषाꣳ सहस्रयोजनेऽव
धन्वानि तन्मासि ॥६०॥ ये तीर्थानि
प्रचरन्ति सृकाहस्ता निषङ्गिणः ॥
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मासि २५
॥६१॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2
जनान् ॥ तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६२ ॥ स एतावन्तश्च भूयांᳬसश्च दिशो रुद्रा वितस्थिरे ॥ तेषांᳬ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६३ ॥ नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः॥ तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते सं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे
दध्मः ॥ ६४ ॥ नमोऽस्तु रुद्रेभ्यो
येऽन्तरिक्षे येषां वात इषवः ॥ तेभ्यो दश
प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीची-
र्दशोर्ध्वाः ॥ तेभ्यो नमो अस्तु ते नो-
ऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च
नो द्वेष्टि तमेषां जम्भे दध्मः ॥६५॥ नमो-
ऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥ तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ६६ ॥ ॐ स्वः ॐ भुवः ॐ भूः ॥

इति रुद्रपाठे पञ्चमोऽध्यायः ॥ ५ ॥

---

१. अत्र 'नमस्ते रुद्र मन्यव' इत्यारभ्य 'जम्भे दध्मः' इत्यध्यायपर्यन्तेन शत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हरिः ॐ ॥ व॒यꣳ सो॑म व्र॒ते तव॒ मन॑स्त॒नूषु॒

रुद्रियाख्येनाऽभिषेकः कार्यः । शतरुद्रियश्च—'षट्षष्टिर्नीलसूक्तं च पुनः षोडशऋग् भवेत् । एष ते द्वे नमस्ते द्वे नतं द्विद्वयमेव च । मीढुष्टमेति चत्वारि ह्येतच्च शत-रुद्रियम् ॥' इति ।

१. अथाऽत्र द्वितीयप्रकारः—हरिः ॐ नमस्ते० (इत्यारभ्य) मानस्तोके० (इति पर्यन्ताः षोडश-मन्त्राः) ॥ १६ ॥ एष ते॑० ॥ १७ ॥ अव॑ रु॒द्र० ॥ १८ ॥ नम॑स्ते० ॥ १९ ॥ या ते॑० ॥ २० ॥ न तं वि॑दाथ॒ य ऽइ॒मा ज॒जाना॒न्यद्यु॒ष्माक॑-मन्त॑रं बभूव ॥ नी॒हारे॑ण॒ प्रावृ॑ता॒ जल्प्या॑ चासु॒तृप॑ ऽउक्थ॒शास॑श्चरन्ति ॥ २१ ॥ २७
वि॒श्वक॑र्म्मा॒ ह्यज॑निष्ट दे॒व ऽआदिद्ग॒न्धर्वो॑ ऽअभवद्द्वि॒तीयः॑ ॥ तृ॒तीयः॑ पि॒ता ज॑नि॒तौष॑-धीनाम॒पां गर्भं॒ व्य॑दधात्पुरु॒त्रा ॥ २२ ॥ मीढु॑ष्टम० ॥ २३ ॥ विकि॑रिद्र० ॥२४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विभ्रंतह ॥ प्रजावन्तह सचेमहि ॥ १ ॥ एष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग ऽआखुस्ते पशुः ॥ २ ॥

सहस्राणि ॥ २५ ॥ असंङ्ख्याता० ॥ २६ ॥ व्वयह सोम० ॥ २७ ॥ एष ते० ॥ २८ ॥ अव रुद्र० ॥ २९ ॥ भेषजमसि० ॥ ३० ॥ त्र्यम्बकं० ॥ त्र्यम्बकं० ॥ ३१ ॥ एतत्ते० ॥ ३२ ॥ त्र्यायुषं० ॥ ३३ ॥ शिवो नामा० ॥ ३४ ॥ उग्रश्च ॥ ३५ ॥ अग्निह्हृदये० ॥ ३६ ॥ उग्रँ लोहितेन० ॥ ३७ ॥ स्वस्ति न ऽइन्द्रो० ॥ ३८ ॥ पयं÷ पृथिव्व्यां० ॥ ३९ ॥ व्विष्णो रराटं० ॥ ४० ॥ अग्निर्देवता० ॥ ४१ ॥ द्यौः शान्तिं० ॥४२॥ (पश्चात् व्वाजश्च मे० ऋचं व्वाचं० इत्यध्यायद्वयं पठेत् ॥)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ॥ यथा
नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् ॥३॥ भेषजमसि भेषजं
गवेऽश्वाय पुरुषाय भेषजम् ॥ सुखं मेषाय
मेष्यै ॥ ४ ॥ त्र्यम्बकं यजामहे सुगन्धि
पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्यो-
र्मुक्षीय माऽमृतात् ॥ त्र्यम्बकं यजामहे
सुगन्धिं पतिवेदनम् ॥ उर्वारुकमिव
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बन्धनादितो मुक्षीय मामृतः ॥ ५ ॥
एतत्ते रुद्राऽवसं तेन परो मूजवतोऽतीहि ॥
अवततधन्वा पिनाकावसः कृत्तिवासा
ऽअहिंसन्नः शिवोऽतीहि ॥ ६ ॥ त्र्यायुषं
जमदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु
त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥ ७ ॥ शिवो
नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा
मा हिंसीः ॥ निवर्त्तयाम्यायुषेऽन्नाद्याय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजनंनाय रायस्पोषाय सुप्रजास्त्वायं
सुवीर्य्याय ॥ ८ ॥

इति रुद्रपाठे षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः

हरिः ॐ ॥ उग्रश्चं भीमश्च ध्वान्तश्च
धुनिश्च ॥ सासह्वाँश्चाभियुग्वा चं विक्षिपः
स्वाहां ॥१॥ अग्निः हृदयेनाशनिः हृदया- २९
ग्रेणं पशुपतिं कृत्स्नहृदयेन भवं यक्ना ॥ शर्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मतंस्नाभ्यामीशानं मन्युना महादेवमन्तः
पर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः
शिङ्गीनि कोश्याभ्याम् ॥ २ ॥ उग्रँ
ल्लोहितेन मित्रः सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं
प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा ॥ भवस्य
कण्ठ्यः रुद्रस्यान्तःपार्श्व्यं महादेवस्य
यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥३॥
लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वाहा त्वचे स्वाहा लोहिताय स्वाहा
लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः
स्वाहा ॥ माᳫँसेभ्यः स्वाहा माᳫँसेभ्यः
स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः
स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा
मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा ॥ रेतसे
स्वाहा पायवे स्वाहा ॥४॥ आयासाय स्वाहा ३०
प्रायासाय स्वाहा संयासाय स्वाहा विया-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
साय स्वाहाद्यासाय स्वाहा ॥ शुचे स्वाहा
शोचते स्वाहा शोचमानाय स्वाहा शोकाय
स्वाहा ॥५॥ तपसे स्वाहा तप्यते स्वाहा
तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय
स्वाहा ॥ निष्कृत्यै स्वाहा प्रायश्चित्यै
स्वाहा भेषजाय स्वाहा ॥६॥ यमाय स्वाहा-
न्तकाय स्वाहा मृत्यवे स्वाहा ॥ ब्रह्मणे
स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवे-
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
 ब्भ्युꣳस्वाहा द्यावापृथिवीब्भ्याꣳस्वाहा ॥ ७ ॥
 इति रुद्रपाठे सप्तमोऽध्यायः ॥ ७ ॥

अथाऽष्टमोऽध्यायः

हरिः ॐ ॥ व्वाजश्च मे प्रसवश्च मे
प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च
मे स्वरश्च मे श्श्लोकश्च मे श्श्रवश्च मे
श्श्रुतिश्च मे ज्ज्योतिश्च मे स्वश्च मे यज्ञेन ३१
कल्पन्ताम् ॥ १ ॥ प्राणश्च मेऽपानश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे व्व्यानश्च मेऽसुश्च मे चित्तं च म
ऽआधीतं च मे व्वाक् च मे मनश्च
मे चक्षुश्च मे श्श्रोत्रं च मे दक्षश्च
मे बलं च मे यज्ञेन कल्पन्ताम् ॥२॥ ओजश्च
मे सहश्च म ऽआत्मा च मे तनूश्च मे शर्म्म
च मे व्वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे
परूᳬंषि च मे शरीराणि च मऽआयुश्च मे
जरा च मे यज्ञेन कल्पन्ताम् ॥३॥ ज्यैष्ठ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च मु ऽआधिपत्त्यं च मे मुन्न्युश्च मे
भामंश्च मेऽमंश्च मेऽम्भंश्च मे जेमा चं मे
महिमा चं मे व्वरिमा चं मे प्प्रथिमा चं मे
व्वर्षिमा चं मे द्राघिमा चं मे वृद्धं चं मे वृद्धिश्च
मे यज्ञेनं कल्प्पन्ताम् ॥४॥ (नं०) सत्त्यं चं

पहिली आवृत्ति

---

१. अत्राऽयं विचारः— 'वेद-वेदा-ऽब्धि-रामश्च राम-राम-द्वि कैकंकम् । द्वौ द्वौ पृथग्भिर्मन्त्रैस्तु नमकाश्चमकाः स्मृताः ॥ वाजश्च सत्यमूर्क्चाऽश्मा चाऽग्निरंशुस् तथाऽग्निकः । एका चैव चतस्रश्च त्र्यविर्वाजा इति क्रमः । एवं चमकानेकादशधा विभज्य, एकैकभागं नमकेषु संयोज्य पठेत् , स 'रुद्रः' । तैरेकादशरुद्रैः 'लघुरुद्रः' । तैरेकादशगुणैः 'महारुद्रः' । तैरेकादशावृत्तैः 'अतिरुद्रः' ॥ एवं चाऽत्र 'नमस्ते' इत्यारभ्य 'जम्भे दध्मः' इत्यध्यायपर्यन्तं पठनीयम् । एवमग्रेऽपि बोद्धव्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च
मे महश्च मे क्रीडा चं मे मोदश्च मे जातं
चं मे जनिष्यमाणं च मे सूक्तं चं मे सुकृतं
चं मे यज्ञेनं कल्पन्ताम् ॥५॥ ऋतं चं मेऽमृतं
च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च
मे दीर्घायुत्वं चं मेऽनमित्रं च मेऽभयं
च मे सुखं चं मे शयनं च मे सूषाश्च मे
सुदिनं च मे यज्ञेनं कल्पन्ताम् ॥६॥ यन्ता

Kirtikant Sharma Collection, Najafgarh

च॑ मे धु॒र्त्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒
विश्वं॑ च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑
च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे॒
लय॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥ ७ ॥ शं
च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑
मे॒ काम॑श्च मे सौमन॒सश्च॑ मे॒ भग॑श्च मे॒
द्रवि॑णं च मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ ३३
वसी॑यश्च मे॒ यश॑श्च मे य॒ज्ञेन॑ कल्पन्ताम्

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ८ ॥ (नं०) ऊर्क्कच मे सूनृता च मे
पयंश्च मे रसंश्च मे घृतं च मे मधु च मे
सग्धिश्च मे सपीतिश्च मे कृषिश्च
मे व्वृष्टिश्च मे जैत्रं च म ऽऔद्भिद्यं
च मे यज्ञेन कल्पन्ताम् ॥ ९ ॥ रयिश्च
मे रायंश्च मे पुष्टं च मे पुष्टिश्च मे विभु
च मे प्रभु च मे पूर्णं च मे पूर्णतरं
च मे कुयवं च मेऽक्षितं च मेऽन्नं च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

मेऽक्षुच्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥ १० ॥ वि॒त्तं
च॑ मे वे॒द्यं च मे भू॒तं च॑ मे भवि॒ष्यच्च॑
मे सु॒गं च॑ मे सुप॒थ्यं॒ च म ऽऋ॒द्धं च॑ मे
ऽऋद्धि॑श्च मे क्लृ॒प्तं च॑ मे क्लृप्ति॑श्च मे म॒तिश्च॑
मे सुम॒तिश्च॑ मे य॒ज्ञेन॑ कल्पन्ताम् ॥ ११ ॥
व्री॒हय॑श्च मे यवा॑श्च मे माषा॑श्च मे तिला॑श्च
मे मु॒द्गाश्च॑ मे ख॒ल्वा॑श्च मे प्रि॒यङ्ग॑वश्च
मेऽणव॑श्च मे श्या॒मा॒काश्च॑ मे नी॒वारा॑श्च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोधूमाश्च मे मसूराश्च मे युज्ञेन कल्पन्ताम्
॥ १२ ॥ (न०) अश्मा च मे मृत्तिका
च मे गिरयंश्च मे पर्वताश्च मे सिकंताश्च
मे वनस्पतंयश्च मे हिरंण्यं च मेऽयंश्च
मे श्यामं च मे लोहं च मे सीसं च मे
त्रपुं च मे युज्ञेनं कल्पन्ताम् ॥ १३ ॥
अग्निश्चं म ऽआपंश्च मे वीरुधंश्च मे
ऽओषंधयश्च मे कृष्टपच्याश्चं मेऽकृष्टपच्याश्चं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे ग्राम्म्याश्च मे पशव ऽआरण्ण्याश्च मे
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे
यज्ञेन कल्पन्ताम् ॥१४॥ वसु च मे वसतिश्च
मे कर्म्म च मे शक्तिश्च मेऽर्थश्च म
ऽएमश्च मऽइत्या च मे गतिश्च मे यज्ञेन
सौ वी आहुति कल्पन्ताम् ॥ १५ ॥ (न०) ॥ अग्निश्च
म ऽइन्द्रश्च मे सोमश्च म ऽइन्द्रश्च ३५
मे सविता च म ऽइन्द्रश्च मे सरस्वती च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

म ऽइन्द्रश्च मे पूषा च म ऽइन्द्रश्च मे बृहस्पतिश्च म ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १६ ॥ मित्रश्च म ऽइन्द्रश्च मे वरुणश्च म ऽइन्द्रश्च मे धाता च म ऽइन्द्रश्च मे त्वष्टा च म ऽइन्द्रश्च मे मरुतश्च म ऽइन्द्रश्च मे विश्वे च मे देवा ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १७ ॥ पृथिवी च म ऽइन्द्रश्च मेऽन्तरिक्षं च म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 ऽइन्द्रश्च मे द्यौश्च म ऽइन्द्रश्च मे
३६ समाश्च म ऽइन्द्रश्च मे नक्षत्राणि च मे ८
ऽइन्द्रश्च मे दिशश्च म ऽइन्द्रश्च मे सर्वे
कल्पन्ताम् ॥ १८ ॥ (न०) ॥ अꣳशुश्च
मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च
म ऽउपाꣳशुश्च मेऽन्तर्यामश्च म ऽऐन्द्र-
वायवश्च मे मैत्रावरुणश्च म ऽआश्विनश्च मे ३६
प्प्रतिप्प्रस्थानश्च मे शुक्रश्च मे मन्थी च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञेन कल्पन्ताम् ॥१९॥ आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्कैवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥ स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

म ऽआग्रयणीयश्च मे वैश्वदेवश्च मे बर्हिश्च
मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन
कल्पन्ताम् ॥ २१ ॥ (न०) अग्निश्च मे
घर्मश्च मेऽर्कश्च मे सूर्य्यश्च मे प्राणश्च
मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे
दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो
दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥ व्रतं ३७
च म ऽऋतवश्च मे तपश्च मे संवत्सरश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
मेऽहोरात्रे ऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥ (न०) ॥
एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मे ऽएकादश च मे ऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे नवंदश च मे ऽएकंविꣳशतिश्च मे ऽएकं-
३८ विꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयो-
विꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्च-
विꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्त-
विꣳशतिश्च मे नवविꣳशतिश्च मे नव-
विꣳशतिश्च मे ऽएकत्रिꣳशच्च मे ऽएकं-
त्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन ३८
कल्पन्ताम् ॥ २४ ॥ (न०) ॥ चतस्रश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश
च मे षोडश च मे षोडश च मे विꣳशतिश्च
मे विꣳशतिश्च मे चतुर्विꣳशतिश्च
मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च
मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे
द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च
मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे चतु-
श्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

ऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥

३१ ॥ २५ ॥ (न०) ॥ त्र्यविश्च मे त्र्यवी च मे
दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे
पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्य्य-
वाट् च मे तुर्य्यौही च मे यज्ञेन कल्पन्ताम्
॥ २६ ॥ पष्ठवाट् च मे पष्ठौही च म ऽउक्षा च
मे वशा च म ऽऋषभश्च मे वेहच्च मेऽनड्वाँश्च ३१
मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥ २७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१० म॰२८ (नं०) ॥ वाजाय स्वाहा प्रसवाय स्वाहा-
पिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहा-
ऽहर्पतये स्वाहान्हे मुग्धाय स्वाहा
मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन
ऽआन्त्यायनाय स्वाहान्त्याय भौवनाय
स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा
प्रजापतये स्वाहा ॥ इयं ते राण्मित्राय
यन्तासि यमन ऽऊर्जे त्वा वृष्ट्यै त्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्र॒जानां॑ त्वाधि॑पत्याय ॥ २८ ॥ आयु॑र्य॒ज्ञेन॑
कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतां॒ चक्षु॑र्य॒ज्ञेन॑
कल्पताꣳ श्रोत्रं॑ य॒ज्ञेन॑ कल्पतां॒ वाग्य॒ज्ञेन॑
कल्पतां॒ मनो॑ य॒ज्ञेन॑ कल्पतामा॒त्मा
य॒ज्ञेन॑ कल्पतां॒ ब्र॒ह्मा य॒ज्ञेन॑ कल्पतां॒
ज्योति॑र्य॒ज्ञेन॑ कल्पताꣳ॒ स्व॑र्य॒ज्ञेन॑
कल्पतां पृ॒ष्ठं य॒ज्ञेन॑ कल्पतां य॒ज्ञो ४०
य॒ज्ञेन॑ कल्पताम् ॥ स्तोम॑श्च॒ यजु॑श्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽऋक् च साम च बृहच्च रथन्तरं च ॥
स्वर्द्देवा ऽअगन्मामृता ऽअभूम प्प्रजापतेः
प्प्रजा ऽअभूम वेट् स्वाहा ॥ २९ ॥

इति रुद्रपाठेऽष्टमोऽध्यायः ॥ ८ ॥

परिशिष्टाध्यायः

अथ शान्त्यध्यायः

हरिः ॐ ॥ ऋचं वाचं प्रपद्ये मनो यजुः
प्प्रपद्ये साम प्प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये ॥
वागोजः सहौजो मयि प्प्राणापानौ ॥ १ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वाति-
तृण्णं बृहस्पतिर्म्मे तद्दधातु ॥ शं नो भवतु
भुवनस्य यस्पतिः ॥ २ ॥ भूर्भुवः स्वः
तत्सवितुर्व्वरेण्यं भर्ग्गो देवस्य धीमहि ॥
धियो यो नः प्रचोदयात् ॥ ३ ॥ कया
नश्चित्र ऽआभुवदूती सदावृधः सखा ॥ कया
शचिष्ठया वृता ॥ ४ ॥ कस्त्वा सत्यो मदानां ४१
मंहिष्ठो मत्सदन्धसः ॥ दृढा चिदारुजे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्वसु ॥ ५ ॥ अभी षु णः सखीनामविता जरितॄणाम् ॥ शतं भवास्यूतिभिः ॥ ६ ॥ कया त्वं न ऽऊत्याभि प्रमन्दसे व्वृषन् ॥ कया स्तोतृभ्य ऽआभर ॥ ७ ॥ इन्द्रो व्विश्वस्य राजति ॥ शं नो ऽअस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥ शं नो मित्रः शं व्वरुणः शं नो भवत्वर्यमा ॥ शं न ऽइन्द्रो बृहस्पतिः शं नो व्विष्णुरुरुक्रमः ॥ ९ ॥ शं नो व्वातः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पवता॒ᳫं शं न॑स्तपतु॒ सूर्य॑ः ॥ शं नुः॑ कनि॑-
क्र॑दद्दे॒वः प॒र्जन्न्यो॑ ऽअ॒भिव॑र्षतु ॥ १० ॥
अहा॑नि॒ शं भ॑वन्तु नुः शᳫ रात्री॒ः प्रति॑धीय-
ताम् ॥ शं नं ऽइन्द्रा॒ग्नी भ॑वता॒मवो॑भिः॒ शं
न॒ ऽइन्द्रा॒वरु॑णा रा॒तह॑व्व्या ॥ शं नं ऽइन्द्रा-
पू॒षणा॒ व्वाजं॑सातौ॒ शमिन्द्रा॒सोमा॑ सुवि॒ताय॒
शं य्योः ॥ ११ ॥ शं नो॑ दे॒वीर॒भिष्ट॑य॒
ऽआपो॑ भवन्तु पी॒तये॑ ॥ शं य्योर॒भिस्र॑वन्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
नः ॥१२॥ स्योना पृथिवि नो भवानृक्षरा
निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥१३॥
आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन ॥
महे रणाय चक्षसे ॥ १४ ॥ यो वः
शिवतमो रसस्तस्य भाजयतेह नः ॥
उशतीरिव मातरः ॥१५॥ तस्मा ऽअरं गमाम
वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा
च नः ॥१६॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथिवी शान्तिरापः शान्तिरोषधयः
शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे
देवाः शान्तिर्ब्रह्म शान्तिः सर्वं
शान्तिः शान्तिरेव शान्तिः सा मा
शान्तिरेधि ॥ १७ ॥ दृते दृꣳह मा मित्रस्य
मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ॥
मित्रस्याऽहं चक्षुषा सर्वाणि भूतानि समीक्षे ॥ ४३
मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥ दृते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृꣳह मा ॥ ज्योक्ते संदृशि जीव्यासं ज्योक्ते संदृशि जीव्यासम् ॥ १९ ॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥ २० ॥ नमस्ते ऽअस्तु विद्युते नमस्ते स्तनयित्नवे ॥ नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २१ ॥ यतो यतः समीहसे ततो नो ऽअभयं कुरु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः
॥ २२ ॥ सुमित्रिया न ऽआप ओषधयः
सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मा-
न्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम
शरदः शतं जीवेम शरदः शतꣳ शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतमदीनाः
स्याम शरदः शतं भूयश्च शरदः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शतात् ॥ २४ ॥

इति रुद्रपाठे शान्त्यध्यायः ॥ ९ ॥

अथ स्वस्तिप्रार्थनामन्त्राध्यायः

हरिः ॐ ॥ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १ ॥ ॐ पयः पृथिव्यां पय ऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ पयस्वतीः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 प्प्रादिशं सन्तु मह्यम् ॥ २ ॥ ॐ व्विष्णो
 रराटमसि व्विष्णोः श्नप्त्रे स्त्थो व्विष्णोः
स्यूरसि व्विष्णोर्ध्रुवोऽसि ॥ व्वैष्णवमसि
व्विष्णवे त्त्वा ॥ ३ ॥ ॐ अग्निर्द्देवता
व्वातो देवता सूर्य्यो देवता चन्द्रमा देवता
व्वसवो देवता रुद्रा देवतादित्या देवता
मरुतो देवता व्विश्वेदेवा देवता बृहस्पति-
र्द्देवतेन्द्रो देवता व्वरुणो देवता ॥ ४ ॥ ॐ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो
नमः ॥ भवेभवेनाति भवे भवस्व मां
भवोद्भवाय नमः ॥ ५ ॥ वामदेवाय नमो
ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बल-
विकरणाय नमो बलाय नमो बलप्रमथनाय
नमः सर्वभूतदमनाय नमो मनोन्मनाय
नमः ॥ ६ ॥ अघोरेभ्योऽथ घोरेभ्यो घोर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते
ऽअस्तु रुद्ररूपेभ्यः ॥ ७ ॥ तत्पुरुषाय
विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः
प्रचोदयात् ॥८॥ ईशानः सर्वविद्यानामीश्वरः
सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोऽधिपति-
र्ब्रह्मा शिवो मे ऽअस्तु सदाशिवोम् ॥ ९ ॥
ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते
ऽअस्तु मा मा हिꣳसीः ॥ निर्वर्त्तयाम्यायुषे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजा-
स्त्वायं सुवीऽर्य्याय ॥१०॥ ॐ विश्वानि देव-
सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न
ऽआसुव ॥११॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ
शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः
शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे
देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः
शान्तिरेव शान्तिः सामा शान्तिरेधि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ १२ ॥ ॐ सर्व्वेषां वा ऽएष व्वेदानाᳫं रसो यत्साम सर्व्वेषामेवैनमेतद्वेदानाᳫं रसेनाभि-षिञ्चति ॥ १३ ॥

ॐ शान्तिः, शान्तिः, सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु । अनेन रुद्राऽभिषेक-कर्म्मणा कृतेन श्रीभवानीशङ्करमहारुद्रः प्रीयतां न मम । ॐ सदाशिवार्पणमस्तु ।

इति स्वस्तिप्रार्थनामन्त्राध्यायः ॥ १० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

❁ अभिषेकान्ते पूजनम् ❁

ॐ भूर्भुवः स्वः श्रीभवानीशङ्करदेवताभ्यो नमः आचमनं हस्तप्रक्षालनं च समर्पयामि। वस्त्रम्—ॐ तस्माद्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे। छन्दाᳬसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ ॐ भू० श्रीभवानीशङ्कर-देवताभ्यो नमः वस्त्रं समर्पयामि। यज्ञोपवीतम्—ॐ तस्मादश्वा ऽअजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः॥ ॐ भू० श्री० नमः यज्ञोपवीतं सम०। गन्धम्—ॐ तं यज्ञं बर्हिषि प्रौक्षन्-न्पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऽऋषयश्च ये॥ ॐ भू० श्री० नमः गन्धं सम०। अक्षतान्—ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥ ॐ भू० श्री० नमः अक्षतान् सम०॥ पुष्पाणि—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत्किं बाहू किमूरू

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पादो ऽउच्चयेत ॥ ॐ भू० श्री० नम० पुष्पाणि सम० । बिल्वपत्रार्पणम्—ॐ शिवो भव प्रजाभ्यो मानुंषीभ्यस्त्वमंङ्गिरः । मा द्यावापृथिवी ऽअभिशोचीर्मान्तरिक्षं मा वनस्पतीन् ॥ ॐ भू० श्री० नमः बिल्वपत्राणि सम० । सौभाग्यद्रव्याणि—ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांᳬ सं परिपातु विश्वतः ॥ ॐ भू० श्री० नमः सौभाग्यद्रव्याणि सम० । धूपम्—ॐ ब्राह्मणोऽस्य मुखंमासीद्बाहू राजन्यः कृतः । ऊरू तदंस्य यद्वैश्यः पद्भ्याᳬ शूद्रो अंजायत ॥ ॐ भू० श्री० नमः धूपमाघ्रापयामि । दीपम्—ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरंजायत ॥ ॐ भू० श्री० नमः घृतपूरितनीराजनदीपं दर्शयामि । नैवेद्यम्—ॐ नाभ्या ऽआसीदन्तरिक्षᳬ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ ऽअकल्पयन् ॥ ॐ प्राणाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ भू० स्व० श्री० नमः नैवेद्यं सम० । ॐ भू० स्व० श्री० नमः मध्ये पानीयम्, उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनम् आचमनीयं करोद्वर्तनार्थे चन्दनं च सम० । मुखवासार्थे फल-ताम्बूलम्—ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ॐ भू० स्व० श्री० नमः ताम्बूलं सम० । ऋतुफलम्—याः फलिनीर्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः । हिरण्यदक्षिणा—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ॐ भू० स्व० श्री० नमः हिरण्यदक्षिणां सम० ।

आरातिक्यम्—ॐ जय गङ्गाधर हर शिव जय गिरिजाधीश ॥ शिव० ॥ त्वं
७ मां पालय नित्यं कृपया जगदीश ! । हर हर हर महादेव० ॥१॥ कैलासे गिरिशिखरे कल्पद्रुमविपिने ॥ शिव० । गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने ॥ हर हर ॥ २ ॥ कोकिलकूजति खेलति, हंसावनललिता ॥ शिव० ॥ रचयति कलाकलापं नृत्यति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुदसहिता ॥ हर हर० ॥३॥ तस्मिँल्ललितसुदेशे शालामणिरचिता ॥ शिव० ॥ तन्मध्ये
हरनिकटे गौरी मुदसहिता ॥ हर हर० ॥ ४ ॥ क्रीडां रचयति भूषां रञ्जितनिज-
मीशम् ॥ शिव० ॥ ब्रह्मादिक-सुरसेवित प्रणमति ते शीर्षम् । हर हर० ॥ ५ ॥ विबुध-
वधूर्बहु नृत्यति हृदये मुदसहिता ॥ शिव० ॥ किन्नरगानं कुरुते सप्तस्वरसहिता ॥
हर हर० ॥ ६ ॥ धिनक तथैथै धिनकत मृदङ्ग वाजयते ॥ शिव० ॥ क्वणत्क्व-
णललिता वेणुर्मधुरं नादयते ॥ हर हर० ॥ ७ ॥ रुणुरुणु चरणे रचयति नूपुरमु-
ज्ज्वलिता ॥ शिव० ॥ चक्रावर्ते भ्रमयति कुरुते तां धिकताम् ॥ हर हर० ॥ ८ ॥
तां तां लुपचुपतालं मधुरं नादयते ॥ शिव० ॥ अङ्गुष्ठाऽङ्गुलिनादं लास्यकतां कुरुते ॥
हर हर० ॥ ९ ॥ कर्पूरद्युतिगौरं पञ्चाननसहितम् ॥ शिव० ॥ त्रिनयनशशिधरमौले
विषधरकण्ठयुतम् ॥ हर हर० ॥ १० ॥ सुन्दरजटाकलापं पावकयुतभालम् ॥ शिव० ॥
डमरुत्रिशूलपिनाकं करधृतनृकपालम् ॥ हर हर० ॥ ११ ॥ शङ्खनिनादं कृत्वा झल्लरि
नादयते ॥ शिव० ॥ नीराजयते ब्रह्मा वेदऋचां पठते ॥ हर हर० ॥ १२ ॥ इति
मृदुचरणसरोजे हृदि कमले धृत्वा ॥ शिव० ॥ अवलोकयति महेशम् ईशम् अभि-
नत्वा ॥ हर हर० ॥ १३ ॥ रुण्डरचित उरमालापन्नगमुपवीतम् ॥ शिव० ॥ वाम-
विभागे गिरिजारूपम् अतिललितम् ॥ हर हर० ॥ १४ ॥ सकलशरीरे मनसिजकृत-
भस्माभरणम् ॥ शिव० ॥ इति वृषभध्वजरूपं तापत्रयहरणम् ॥ हर हर० ॥ १५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
ध्यानं आरतिसमये हृदये इति कृत्वा ॥ शिव० । रामं त्रिजटानाथम् ईशम् अभिनत्वा ॥ हर हर० ॥ १६ ॥ सङ्गितमेवं प्रतिदिनपठनं यः कुरुते । शिव० ॥ शिवसायुज्यं गच्छति भक्त्या यः शृणुते ॥ हर हर० ॥ १७ ॥

ॐ इदꣳ हविः प्रजननं मे ऽअस्तु दशवीरꣳ सर्व्वगणꣳ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि ॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो ऽअस्मासु धत्त ॥ ॐ भू० स्व० श्री नमः आरातिक्यं सम ॥ प्रदक्षिणा—ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्न्वाना ऽअबध्नन्पुरुषं पशुम् ॥ ॐ भू० स्व० श्री० नमः प्रदक्षिणां सम० । मन्त्रपुष्पाञ्जलिः—ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्न्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ ॐ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यम् । कामे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

श्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय। महाराजाय नमः॥

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात्। पृथिव्यै समुद्रपर्यन्ताया एकराडिति। तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽवसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ ॐ भू० स्व० श्री० नमः मन्त्रपुष्पाञ्जलिं नमस्कारांश्च सम०। ततः शिवपार्षदपूजां कृत्वा, विशेषाऽर्घ्यः—रक्ष रक्ष महादेव! रक्ष त्रैलोक्यरक्षक!॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥ वरद! त्वं वरं देहि वाञ्छितं वाञ्छितार्थद!। अनेन सफलार्घ्येण फलदोऽस्तु सदा मम॥ ॐ भू० स्व० श्री० नमः विशेषाऽर्घ्यं सम०। प्रार्थना—भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः, कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः। ईषत्ताम्रजटाऽग्रपल्लवयुतो न्यस्तो जगन्मण्डपे, शम्भुर्मङ्गलकुम्भतामुपगतो भूयात् सतां श्रेयसे॥ ॐ भू० स्व० श्री० नमः प्रार्थनां सम०। क्षमापनम्—करचरणकृतं वाक्कायजं कर्मजं वा, श्रवणनयनजं वा मानसं वाऽपराधम्। विहितमविहितं वा सर्वमेतत् क्षमस्व, जय जय करुणाब्धे! श्रीमहादेव शम्भो!॥ आवाहनं न जानामि न जानामि तवाऽर्चनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर!॥ अर्पणम्—अनेनाऽऽवाहनादि-षोडशोपचारैः अन्यो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पचारैश्च यथाज्ञानेन यथामिलितोपचारद्रव्यैः कृतेन पूजनाख्येन कर्मणा ॐ भूर्भुवः स्वः श्रीभवानीशङ्करदेवताः प्रीयन्तां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ।

इति 'देवरिया'-मण्डलान्तर्गत-सुप्रसिद्ध-'मझौली राज्य'-वास्तव्येन
मिश्रोपाह्व-विद्वद्वर-पण्डित-श्रीसन्तशरणशर्म्मसूनुना
आचार्यपण्डितश्रीशिवदत्तमिश्रशास्त्रिणा
रुद्राभिषेकप्रयोग-टिप्पण्यादिभिश्च सम्भूष्य
सम्पादिता रुद्राष्टाध्यायी समाप्ता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ रुद्राभिषेकमाहात्म्यम्

श्रीशिव उवाच

शृणु देवि ! प्रवक्ष्यामि रुद्र-सेचन-कर्मणः । महिमानं मया प्रोक्तं सनकाय शुचिव्रते ॥ १ ॥

श्रीदेव्युवाच

कदा स मुनिशार्दूलः प्राप्तस्त्वां केन हेतुना । कथं रुद्राभिषेकस्य महिमा वर्णिता त्वया ॥ २ ॥

श्रीशिव उवाच

एकदा बालरूपः स विचरन् पृथिवीतले । ददर्श क्लिष्टकर्माणं लोकं दुःखमवाप ह ॥ ३ ॥

तद्दुःखदुःखितो नूनं कैलासं गतवान् द्रुतम् । लोकानां दुःखसन्दोहं कथयामास मां प्रति ॥ ४ ॥

पप्रच्छ च लघूपायं दुःखनाशाय देहिनाम् । मया तत्कथितं भद्रे ! तच्छृणुष्वाऽवधारय ॥ ५ ॥

मुनिसत्तम ! ते दुःखं दृष्ट्वा मे मानसं ध्रुवम् । उपकाराय लोकानां शोचते किञ्चिदुत्तमम् ॥ ६ ॥

मुहुर्मुहुश्चिन्तयमानमुपायमेकमेव हि । रुद्राऽभिषेकादितरं नोत्प्रेक्ष्य साम्प्रतं मुने ॥ ७ ॥

सर्वकर्माणि सन्त्यज्य सुशान्तमनसो यतः । रुद्राभिषेकं कुर्वन्ति दुःखनाशो भवेद् ध्रुवम् ॥ ८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलेन वृष्टिमाप्नोति व्याधिशान्त्यै कुशोदकैः । दध्ना च पशुकामाय श्रिया इक्षुरसेन च ॥ ९ ॥
मध्वाज्येन धनार्थी स्यान्मुमुक्षुस्तीर्थवारिणा । पुत्रार्थी पुत्रमाप्नोति पयसां चाऽभिषेचनात् ॥१०॥
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याऽङ्गना । सद्यः पुत्रमवाप्नोति पयसां चाऽभिषेचनात् ॥११॥
श्रीरुद्रस्य प्रसादेन बद्धो मुच्येत बन्धनात् । भीतो भयात् प्रमुच्येत वन्ध्या पुत्रमवाप्नुयात् ॥१२॥
मूर्खो वाचामधीशः स्याद् दरिद्रो धनिनां वरः । मूको वक्ता भवेत् पङ्गुर्गिरिं लंघयते द्रुतम् ॥१३॥
मनसा कर्मणा वाचा शुचिः सङ्गविवर्जितः । कुर्याद् रुद्राभिषेकं च प्रीतये शूलपाणिनः ॥१४॥
सर्वान् कामानवाप्नोति लभते परमां गतिम् । नन्दते च कुलं पुंसां श्रीमच्छम्भुप्रसादतः ॥१५॥
रुद्राभिषेककर्तृणां विप्राणां प्रीतिहेतवे । गो-भू-हिरण्य-वासांसि स-शक्त्यं प्रतिपादयेत् ॥१६॥
वित्त-शाठ्यं न कर्त्तव्यं कर्मण्यस्मिन् द्विजातिभिः । दातव्यं द्विजवर्येभ्यो गृह्णीदाशिषः शुभाः ॥१७॥
एवं कृते मनुष्याणां वाञ्छासिद्धिः सुनिश्चिता । मोदन्ते बन्धुभिर्लोके लभन्ते परमं पदम् ॥१८॥

इति रुद्राभिषेकमाहात्म्यं समाप्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिवार्चन-संभार

२५

सामग्री	न० पै०
चन्दन	
रोली	०·६
मौली	०·३
धूपबत्ती	०·१२
केसर	०·२५
कपूर	०·६
घृत का दीपक	
रूई	०·३
पान	० ३
सुपारी	०·२५
चावल	०·१२
अबीर(गुलाल)	०·६
बुक्का (अभ्रक)	० ६
पीली सरसो	० १०
यज्ञोपवीत	०·१२

सामग्री		न० पै०
फूल,माला,तुलसी		० ५०
बिल्वपत्र		०·१२
धतूरफल		०·१०
दूर्वा		०·१०
कुशा		
दूध	पञ्चामृत के लिए	०·१०
दही	पञ्चामृत के लिए	०·१०
घृत	पञ्चामृत के लिए	० ५०
शहद	पञ्चामृत के लिए	०·१०
चीनी	पञ्चामृत के लिए	०·१५
गोमूत्र		
गोबर		
नारियल १		०·७५
गिरिगोला १		०·३१
सौभाग्यद्रव्य		० १२
इत्र		०·५०

सामग्री	न० पै०
पेड़ा ऽ॥	१·५०
बतासा ऽ।	० ७५
ऋतुफल	०·७५
दियासलाई	०.७
शङ्ख	
कसोरा	०·१२
पुरवा	०·१२
अग्निहोत्र भस्म	
गङ्गाजल	
इलायची	०.२०
जावित्री	०·१२
जायफल	०·२५
पञ्चमेवा	० ५०
लवङ्ग	०·१२

यजमान के लिए—
कुशासन या ऊर्णासन
धोती १, दुपट्टा १
अंगोछा १
पञ्चपात्र १, आचमनी १
तष्टा १, अर्घा १
कटोरी २
शिवजी के लिए तथा
ब्राह्मणों को वस्त्र —
धोती १, दुपट्टा १
अंगोछा १
दक्षिणा
ब्राह्मणवरण दक्षिणा
अभिषेक दक्षिणा
भूयसी दक्षिणा
ब्राह्मणभोजन दक्षिणा

इति पूजन-सामग्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh